पदपदार्थनिर्वचनम्

सुधाकरमिश्रः

स्फोटोऽष्टधा निरूप्यते। तत्र पदस्कोटादिषु प्रयुक्तस्य पदपदस्य कोऽर्थः? किमियं संज्ञा? कास्य व्युत्पत्तिः? कथं निष्पन्नोऽयं पदशब्दः? इतीदं सर्वं सूत्र-वार्त्तिक-भाष्याण्युद्धृत्य वाक्यपदीयदिशा विचार्यतेऽत्र प्रबन्धे।

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते॥

स्फोटमतावलम्बिनः वैयाकरणाः "शब्दब्रह्मेति" स्वीकुर्वन्ति। तस्य शब्दस्य किं स्वरूपमित्यादिविषयः महाभाष्ये पस्पशाह्निके निरूपितमाचार्यपतञ्जलिना। सिद्धान्त-भूतस्य स्फोटस्य अष्टधा परिकल्पना विद्यते। वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटश्च, तथा च अखण्डपदस्फोटः, अखण्डवाक्यस्फोटभेदात्। अष्टसु स्फोटेषु मुख्यः वाक्यस्फोटः, यतो हि निराकाखार्थबोधकत्वात्। अन्येषां स्फोटानां शास्त्रप्रक्रियानिर्वाहाय परिकल्पना। "तत्रपदपदार्थः कः" इति परिष्क्रयते, पद्यते = गम्यत अर्थोऽनेनेति पदम्। पदगतौ इति धातोः निष्पन्नोऽयं पदशब्दः। पाणिन्यष्टाध्याय्यां महर्षिणा पदम् नाम पदसंज्ञकम्। तच्च पद-संज्ञाविधायकं सूत्रं "सुप्तिङन्तं पदम्[१]", "स्वादिष्वसर्वनामस्थाने[२]", "सिति च[३]" इति लिखितम्। सूत्रत्रयस्य भिन्नं भिन्नं प्रयोजनम्। "सुप्तिङन्तं पदम्" इति सूत्रस्य प्रयोजनं लोके प्रयोगार्हत्वसम्पादनम्। उक्तञ्च भाष्यकारेण "अपदं न प्रयुञ्जीत" अर्थात् अपरिनिष्ठितं न प्रयोक्तव्यमिति। स्वादिष्वसर्वनामस्थाने इति सूत्रस्य फलं जश्त्वकुत्वादि, "सिति च" सित्यस्यफलं भसंज्ञाबाधनम्। तथा तत्प्रयुक्तकार्यस्याभावः। पदं-पदं-पदं-वाक्यम्। पद्यते = प्राप्यते = ज्ञायते येन इति पदम्, वाक्यस्यपदमित्यस्य तात्पर्यं भवति वाक्यस्यप्रतिपादकमिति।

आचार्यभर्तृहरिणा ब्रह्मकाण्डे अष्टपदार्थीनिरुपिता।

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।
अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः॥
कार्यकारणभावेन योग्यभावेन च स्थिताः।
धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु॥[४]

एवं ते शब्दाः द्विविधाः- अन्वाख्येयया:, प्रतिपादकाश्च, अर्था अपि द्विविधाः अपोद्धारपदार्थाः, स्थितलक्षणाश्च। शब्दार्थयोः सम्बन्धा अपि द्विविधाः। कार्यकारणभावरूपाः योग्यभावरूपाश्च, फलमपि द्विविधम्-धर्मः प्रत्ययश्च, यद्यपि वाक्यस्यैव निरंशस्य वाचकत्वादन्तरा पदप्रतिपत्तिर्विभ्रम इति किमसत्येन पदेन व्युत्पादितेनेत्याशङ्क्य पदस्य वाक्येभ्य अपोधृत्य कल्पनया बुद्ध्या पृथक् पदं निष्कृष्य-

द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।
अपोधृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्।।[५]

कैश्चित् आचार्यैः वाक्येभ्यः पदानि अपोधृत्यैव-कल्पनया पृथक्कृत्यैव न तु वस्तुस्थितिमनुरुध्य पदं द्विधा इति। कैश्चित् चतुर्धा कैश्चित् पञ्चधापि।

द्विधा कैश्चित् पदं भिन्नम्-नामाख्यातभेदेन पदं द्विधा इति। नामपदेन सुबन्तं, नमत्याख्यातार्थं प्रतिविशेषणीभवतीति नाम, इति व्युत्पत्तेः। आख्यातं = तिङन्तमिति।

चतुर्धा पञ्चधापि वा- ऋग्वेदे वर्णितमस्ति यत्

चत्वारि शृङ्गा त्रयो अस्य पादा।
द्वे शीर्षे सप्त हस्तासो अस्य॥

त्रिधा बद्धो वृषभो रोरवीति।
महोदेवो मर्त्या आविवेश॥[६]

अस्य मन्त्रस्य भाष्यमित्थम्- चत्वारि शृङ्गाणि, चत्वारि पदजातानि नामाख्यातो पसर्गनिपाताश्च। त्रयो अस्य पादाः- त्रयः काला भूतभविष्यद्वर्तमानाः। द्वे शीर्षे शब्दात्मानौ नित्यः कार्यश्च, सप्तहस्तासो अस्य सप्तविभक्तयः, त्रिधाबद्धः- त्रिषु स्थानेषु बद्धः, उरसि कण्ठे शिरसीति, वृषभो वर्षणात्। रोरवीति-शब्दं करोति।

अपर आह-

चत्वारि वाक्परिमिता पदानि।
तानि विदुर्ब्राह्मण ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति।
तुरीयं वाचो मनुष्या वदन्ति॥[७]

चत्वारि वाक्परिमितापदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। तानि विदुर्ब्राह्मणा ये मनीषिणः मनस इषिणो-मनीषिणः। गुहायां त्रीणि निहितानि

नेङ्गयन्ति, न चेष्टन्ते न निमिषन्तीत्यर्थः, तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः।

तात्पर्यमिदं यत् नामाख्यातोपसर्गनिपातभेदेनचतुर्धा इति भिन्नम्। नामाख्याते हि साक्षादर्थं वदतः, उपसर्गनिपातौ तु तदर्थगतविशेषद्योतकाविति पृथक्कृतौ, कर्मप्रवचनीयानां तु क्रियाविशेषप्रकाशनादुपसर्गेष्वेवान्तर्भाव इति। वा-अथवा कैश्चित्पदं नामाख्यातोपसर्गनिपात कर्मप्रवचनीयभेदेन पञ्चधापि भिन्नम्। कर्मप्रवचनीयानामुपसर्गवत् साक्षात् क्रिया विशेषप्रकाशकत्वाभावादुपसर्गेष्वन्तर्भावासम्भवात्। तथाहि-"शाकल्यस्य संहितामनु प्रावर्षत्" इत्यत्र संहितानिशमनपूर्वकत्वरूपः प्रवर्षणक्रियागतो विशेषोऽनुना न साक्षाद्द्योत्यते, निशमनक्रियाया अश्रुतत्वात्, किन्तु संहिता प्रवर्षणयोर्हेतुहेतुमद्भावादि-द्योतन पुरस्सरं स द्योत्यत इति न साक्षात् क्रियाविशेषप्रकारकेषूपसर्गेषु तेषामन्तर्भाव इति कर्मप्रवचनीयानामुपसर्गतः पृथक् क्रियाया पञ्चधापि कैश्चिद् पदं कल्पितमिति। प्रकृति प्रत्ययादिवत्। यथा पदवादिनां मते पदार्थेभ्यः शास्त्रीयान्वयव्यतिरेक निमित्तकः प्रकृत्यर्थप्रत्ययार्थादीनामापोद्धारस्तन्निमित्तकश्च प्रकृतिप्रत्ययाद्यापोद्धार इति।

द्विधापदमात्रविशेषः- वाक्यात् पदानामपोद्धरणम्, पदाद्वा प्रकृतिप्रत्ययादी-नामपोद्धरणम्, लौकिकाभ्यां शास्त्रीयाभ्यां वा परिकल्पिताभ्यामन्वयव्यतिरेकाभ्यां सिद्धमिति। "द्विधा कैश्चित्पदं भिन्नम्" इत्यत्र भिन्नं भेदः, सामान्यं व्यापको धर्मः। द्वित्वादिकं तु तस्य विशेषः- व्याप्योधर्मः, द्विधा इत्यादौ विधानार्थे धाप्रत्ययोत्पद्यते। यतः प्रकार एव विधार्थः। प्रकारश्च सामान्यस्य-साधारणधर्मस्य, भेदकः सामानाधिकरण्य सम्बन्धेन स्वंविशेषणीकृत्य व्यावर्तकविशेषः।

प्रकृते च द्वित्वं भेदे सामानाधिकरण्यसम्बन्धेन स्वं विशेषणीकृत्य तं त्रित्वादिसमानाधिकरणाद् भेदाद् व्यावर्तयति। वस्तुतोऽखण्डाद् वाक्यादपोद्धृत्यैव नामाख्यातभेदेन पदं द्विधा स्वीकृतमिति यावत्। उपसर्गकर्मप्रवचनीयानामाख्यात एवान्तर्भावः, क्रियागतविशेषद्योतकत्वात्। निपातानां तु सत्वप्रधानानां-स्वरादीनां नाम्नि, क्रियाप्रधानानां तु हिरुगादीनामाख्यातेऽन्तर्भाव इति भावः।

---

१. पा.सू. १/४/१४
२. पा.सू. १/४/१३
३. पा.सू. १/४/१६
४. वाक्यपदीयम् ब्रह्मकाण्डे २४
५. वाक्यपदीयम् पदकाण्डे १
६. पस्पशाह्निके
७. पस्पशाह्निके